**दिनाङ्कः:- 06.06.2024**

**प्रातः:- 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः – पुनीतत्रिपाठी**

**अथवार्ताः**

**एनडीए-नेतृसभा**

राष्ट्रिय-लोकतांत्रिक-संयुत्या सर्वसम्मत्या प्रधानमंत्री नरेन्द्रमोदी स्वीयनेता चितः। ह्यः नव दिल्ल्यां प्रधानमन्त्रिणः आवसे एनडीए इत्यस्याम्-नेतृणां उपवेशने एकः प्रस्तावः पारितः यस्मिन् उल्लिखितः यत् भारतेन विगतदशवर्षेषु एनडीए इत्यस्य -सर्वकारे श्री मोदिनः नेतृत्वे च प्रत्येकस्मिन् क्षेत्रे सर्वतोन्मुखी विकासः दृष्टः। तत्र एतदपि उक्तं यत् देशस्य जनाः षड्दशकानन्तरं तृतीयवारं निरंतरम् बहुमतेन सशक्तं नेतृत्वं चितवन्तः। उपवेशने प्रधानमन्त्रिणं नरेन्द्र मोदिनं समेत्य भाजपाध्यक्ष: जे.पी. नड्डा, राजनाथ सिंहः , अमित शाहः च आस्ताम्।

अपिच उपवेशनेस्मिन् तेलुगु देशम पार्टी (टीडीपी) प्रमुख, एन चंद्रबाबू नायडू, जनता दल (युनाइटेड) प्रमुखः एवं बिहारस्य मुख्यमंत्री, नीतीश कुमारः, लोकजनशक्ति पार्टी (रामविलास) प्रमुखः, चिराग पासवान: अपि च एनडीए घटकेत्यस्य अन्ये नेतारः सम्मिलिताः आसन्।

**इन्डी संयुत्या**

इन्डी संयुत्या नवदिल्ल्यां जाते उपवेशने केन्द्रे सर्वकारनिर्माणविषये स्व-रणनीति विषयमुपरि चर्चा कृता। नवदिल्ल्यां काङ्ग्रेस-अध्यक्षस्य मल्लिकार्जुन-खर्गे-इत्यस्य आधिकारिकनिवासस्थाने ह्यः एषा सभा अभवत्। उपवेशने काङ्ग्रेस-अध्यक्षः मल्लिकार्जुन-खर्गे अवदत् यत्, संयुति : एषा सर्वेषां दलानाम् स्वागतं करोति ये अस्माकं संविधानस्य प्रस्तावनायां निहितमूल्यानि प्रति स्वीय मौलिकप्रतिबद्धतां विनिमयीकुर्वन्ति। इन्डी संयुत्या: उपवेशनानन्तरं वार्ताहरैः सह वार्तालापं कुर्वन् काङ्ग्रेस-अध्यक्षः मल्लिकार्जुन-खर्गे: अवदत् यत्, अनया संयुत्या देशस्य वर्तमानराजनैतिकस्थितेः विषयम् आधृत्य चर्चा कृता।

**प्रधानमन्त्री-त्यागपत्र**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: राष्ट्रपतिभवने राष्ट्रपति द्रौपदी मुर्मू वर्याया सह मेलनं कृत्वा केन्द्रीयमन्त्रिपरिषदा सह स्वीयं त्यागपत्रं प्रदत्तवान्। राष्ट्रपतिः त्यागपत्रं स्वीकृत्य प्रधानमन्त्रिणः केन्द्रीयमन्त्रिपरिषदा च नूतनसर्वकारस्य निर्माणं यावत् पदे यथावदेव भवितुम् आग्रहं कृतवती।

**ओडिशा-त्यागपत्रम् :**

ओडिशायाः -मुख्यमन्त्रिणा नवीनपटनायकेन ह्य: भुवनेश्वर स्थिते राजभवने राज्यपालाय रघुबरदासाय स्वीयत्यागपत्रं प्रदत्तम्। राज्ये सद्य एव समाप्ते विधानसभानिर्वाचने स्वपक्षस्य बीजुजनतादलस्य पराजयानन्तरं तस्य त्यागपत्रं आगतम्। ध्येयं वर्तते यत् श्रीपटनायक: ओडिशाराज्यस्य सर्वाधिकदीर्घकालं यावत् मुख्यमन्त्री रूपेण अस्ति यः पञ्चवारं कार्यं कृतवान्, यो हि चतुर्विंशतिः वर्षाणि त्रयः मासाः च प्रसृतः। ओडिशा-विधानसभायां भाजपेति दलेन सप्तचत्वारिंशदधिकैक शत् आसनेषु अष्टसप्ततिः आसनानि विजितानि।

**केजरीवालमुक्तिः अस्वीकारः**

कथिते मद्यनीतिप्रवञ्चना प्रकरणे दिल्ल्याः मुख्यमन्त्रिणः अरविन्द केजरीवालस्य अल्पावधिकमुक्ति याचिका ह्यः दिल्लीन्यायालयेन अस्वीकृतम्। राउस् एवेन्यू न्यायालयस्य विशिष्टन्यायाधीशः कावेरीबावेजा इत्यनया केजरीवालस्य याचिका चिकित्साकारणात् सप्तदिनानां कृते अल्पावधिकमुक्ति याचिका अस्वीकृता। न्यायालयेन तिहाडकारागारस्य अधिकारिभ्यः निर्देशः प्रदत्तः यत् ते केजरीवालस्य न्यायिकनिग्रहकाले चिकित्साया: आवश्यकताः पूरयन्तु। तस्य अल्पावधिकमुक्ति याचिकाया: जूनमासस्य सप्तमे दिनाङ्के श्रवणं भविष्यति।

**फ्रेंच ओपन टेनिस- बोपन्ना**

फ्रेंच ओपन टेनिसक्रीडायां, रोहन बोपन्ना मैथ्यूएबडेन इत्यनयो: भारत ऑस्ट्रेलिया युगलं प्रतिस्पर्द्धा उपांत्य चक्रे सिमोनबोलेली, एंड्रिया वावसोरी इत्यनयो: युगलेन सह भविष्यति।

**विश्व-चषक-प्रतिस्पर्धा**

विंशति-प्रतिविंशति विश्व-चषक-प्रतिस्पर्धायां भारतीयदलेन गतरात्रौ स्वीयाभियानस्य शुभारम्भ: कृत:। न्यूयॉर्कनगरे भारत दलेन आयरलैण्डदलं अष्ट-स्तोभै: पराजितम्।

**॥ इति वार्ता:॥**